# टन्त्रोक्तम् देवीसुक्तम्  ṭantroktam devīsuktam

(ḥymn to the ġoddess mother)

नमो देव्यै महादेव्यै शिवायै सततं नमः
namo devyai mahādevyai śivāyai satataṁ namaḥ
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम्
namaḥ prakr̆tyai bhadrāyai niyatāḥ praṇatāḥ sma tām
रौद्रायै नमो नित्यायै गौर्यै धात्र्यै नमो नमः
raudrāyai namo nityāyai gauryai dhātrayai namo namaḥ
ज्योत्स्नायै चेन्दु रूपिण्यै सुखायै सततं नमः
jyotsnāyai cendu rūpiṇyai sukhāyai satataṁ namaḥ

कल्यान्यै प्रनता वृद्ध्यै सिद्ध्यै कुर्मो नमो नमः
kalyānyai pranatā vr̆ddhyai siddhyai kurmo namo namaḥ
नैरृत्यै भूभृताम् लक्श्म्यै शर्वाण्यै ते नमो नमः
nair̆tyai bhūbhr̆tām lakśmyai śarvāṇyai te namo namaḥ

दुर्गायै दुर्ग पारायै सारायै सर्वकारिण्यै
durgāyai durga pārāyai sārāyai sarvakāriṇyai
ख्यात्यै तथैव कृष्णायै धूम्रायै सततं नमः
khyātyai tathaiva kr̆ṣṇāyai dhūmrāyai satataṁ namaḥ

अति सौम्याति रौद्रायै नतस्तस्यै नमो नमह्
ati saumyāti raudrāyai natastasyai namo namah
नमो जगत् प्रतिष्ठायै देव्यै कृत्यै नमो नमः
namo jagat pratiṣṭhāyai devyai kr̆tyai namo namaḥ

या देवी सर्वभूतेषु विष्णुमयेति शब्दित
yā devī sarvabhūteṣu viṣṇumayeti śabdita
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः
namastasyai namastasyai namastasyai namo namaḥ

या देवी सर्वभूतेषु चेतनेत्य भीधियते
yā devī sarvabhūteṣu cetanetya bhīdhiyate
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः
namastasyai namastasyai namastasyai namo namaḥ

या देवी सर्वभूतेषु बुद्धि रूपेण संस्थिता
yā devī sarvabhūteṣu buddhi rūpeṇa saṁsthitā
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः
namastasyai namastasyai namastasyai namo namaḥ

या देवी सर्वभूतेषु निद्र रूपेण संस्थिता
yā devī sarvabhūteṣu nidra rūpeṇa saṁsthitā
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः
namastasyai namastasyai namastasyai namo namaḥ

या देवी सर्वभूतेषु क्शुधा रूपेण संस्थिता
yā devī sarvabhūteṣu kśudhā rūpeṇa saṁsthitā
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः
namastasyai namastasyai namastasyai namo namaḥ

या देवी सर्वभूतेषु चाया रूपेण संस्थिता
yā devī sarvabhūteṣu cāyā rūpeṇa saṁsthitā
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः

namastasyai namastasyai namastasyai namo namaḥ

या देवी सर्वभूतेषु शक्ति रूपेण संस्थिता
yā devī sarvabhūteṣu śakti rūpeṇa saṁsthitā
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः
namastasyai namastasyai namastasyai namo namaḥ

या देवी सर्वभूतेषु त्ष्णा रूपेण संस्थिता
yā devī sarvabhūteṣu tr̆ṣṇā rūpeṇa saṁsthitā
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः
namastasyai namastasyai namastasyai namo namaḥ

या देवी सर्वभूतेषु क्शान्ति रूपेण संस्थिता
yā devī sarvabhūteṣu kśānti rūpeṇa saṁsthitā
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः
namastasyai namastasyai namastasyai namo namaḥ

या देवी सर्वभूतेषु जाति रूपेण संस्थिता
yā devī sarvabhūteṣu jāti rūpeṇa saṁsthitā
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः
namastasyai namastasyai namastasyai namo namaḥ

या देवी सर्वभूतेषु लज्जा रूपेण संस्थिता
yā devī sarvabhūteṣu lajjā rūpeṇa saṁsthitā
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः
namastasyai namastasyai namastasyai namo namaḥ

या देवी सर्वभूतेषु शान्ति रूपेण संस्थिता
yā devī sarvabhūteṣu śānti rūpeṇa saṁsthitā

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः
namastasyai namastasyai namastasyai namo namaḥ

या देवी सर्वभूतेषु श्रद्धा रूपेण संस्थिता
yā devī sarvabhūteṣu śraddhā rūpeṇa saṁsthitā
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः
namastasyai namastasyai namastasyai namo namaḥ

या देवी सर्वभूतेषु कान्ति रूपेण संस्थिता
yā devī sarvabhūteṣu kānti rūpeṇa saṁsthitā
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः
namastasyai namastasyai namastasyai namo namaḥ

या देवी सर्वभूतेषु लक्श्मी रूपेण संस्थिता
yā devī sarvabhūteṣu lakśmī rūpeṇa saṁsthitā
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः
namastasyai namastasyai namastasyai namo namaḥ

या देवी सर्वभूतेषु वृत्ति रूपेण संस्थिता
yā devī sarvabhūteṣu vr̆tti rūpeṇa saṁsthitā
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः
namastasyai namastasyai namastasyai namo namaḥ

यह् देवी सर्वभूतेषु स्मृति रूपेण संस्थिता
yah devī sarvabhūteṣu smr̆ti rūpeṇa saṁsthitā
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः
namastasyai namastasyai namastasyai namo namaḥ

या देवी सर्वभूतेषु दया रूपेण संस्थिता
yā devī sarvabhūteṣu dayā rūpeṇa saṁsthitā

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः
namastasyai namastasyai namastasyai namo namaḥ

या देवी सर्वभूतेषु तुष्टि रूपेण संस्थिता
yā devī sarvabhūteṣu tuṣṭi rūpeṇa saṁsthitā
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः
namastasyai namastasyai namastasyai namo namaḥ

या देवी सर्वभूतेषु मातृ रूपेण संस्थिता
yā devī sarvabhūteṣu mātṝi rūpeṇa saṁsthitā
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः
namastasyai namastasyai namastasyai namo namaḥ

या देवी सर्वभूतेषु भ्रान्ति रूपेण संस्थिता
yā devī sarvabhūteṣu bhrānti rūpeṇa saṁsthitā
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः
namastasyai namastasyai namastasyai namo namaḥ

इन्द्रियाणाम् अधिष्ठात्री भूतनं चाखिलेषु या
indriyāṇām adhiṣṭhātrī bhūtanaṁ cākhileṣu yā
भूतेषु सततम् तस्यै व्याप्ति देव्यै नमो नमः
bhūteṣu satatam tasyai vyāpti devyai namo namaḥ

चितिरूपेण या कृत्स्नम् एतद् व्याप्य स्थिता जगत्
citirūpeṇa yā kṝtsnam etad vyāpya sthitā jagat
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः
namastasyai namastasyai namastasyai namo namaḥ